12. अशुद्धिसंशोधना

अभ्यासः

1. अधोलिखितानि वाक्यानि शुद्धानि कुरुत-

प्रश्न i. <u>वयं</u> चित्रं पश्यन्ति।
उत्तरम्:
ते चित्रं पश्यन्ति।

प्रश्न ii. भवान् भोजनं <u>खाद।</u>
उत्तरम्:
भवान् भोजनं खादतु।

प्रश्न iii. त्वं पाठं <u>स्मरतु।</u>
उत्तरम्:
त्वं पाठं स्मर।

प्रश्न iv. सः <u>पीतः</u> वस्त्रं धारयति।
उत्तरम्:
सः पीतं वस्त्रं धारयति।

प्रश्न v. <u>त्रीणि</u> वृक्षाः तत्र शोभन्ते।
उत्तरम्:
त्रयः वृक्षाः तत्र शोभन्ते।

प्रश्न vi. ताः महिलाः न <u>गमिष्यति।</u>
उत्तरम्:
ता: महिला: न गमिष्यन्ति।

प्रश्न vii. <u>त्वम्</u> किं क्रियते?
उत्तरम्:
त्वया कि क्रियते?

प्रश्न viii. पिता श्वः <u>आगच्छति।</u>
उत्तरम्:
पिता श्वः आगमिष्यति।

प्रश्न ix. <u>युष्माभिः</u> किं पठन्ति?
उत्तरम्:
ते किं पठन्ति/यूयं किं पठथ?

प्रश्न x. <u>सः</u> तत्र न सन्ति।
उत्तरम्:
ते तत्र न सन्ति।

प्रश्न xi. अमितेन एतत् कार्यं <u>करोति।</u>
उत्तरम्:
अमितेन एतत् कार्यं क्रियते।

प्रश्न xii. <u>यूयं</u> तत्र न गन्तव्यम्।
उत्तरम्:
युष्माभिः तत्र न गन्तव्यम्।

प्रश्न xiii. मया एतानि फलानि <u>खादितव्यम्।</u>
उत्तरम्:
मया एतानि फलानि खादितव्यानि।

प्रश्न xiv. <u>कन्याः</u> पाठं पठति।
उत्तरम्:
कन्या पाठं पठति।

प्रश्न xv. अम्बा भोजनं <u>पचन्ति।</u>
उत्तरम्:
अम्बा भोजनं पचति।

प्रश्न xvi. तेन भोजनं <u>खादनीयानि।</u>
उत्तरम्:
तेन भोजनं खादनीयम्।

प्रश्न xvii. अम्बा तत्र <u>सन्ति।</u>
उत्तरम्:
अम्बा तत्र अस्ति।

प्रश्न xviii. <u>त्वम्</u> जलं पानीयम्।
उत्तरम्:
त्वया जलं पानीयम्।

प्रश्न xix. <u>ते</u> लेखान् लिखति।
उत्तरम्:
सः लेखान् लिखति।

प्रश्न xx. अस्माभिः <u>फलानि</u> खाद्यते।
उत्तरम्:
अस्माभिः फलं खाद्यते।